## Hanumat Mantraḥ हनुमत् मन्त्रः

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

**manojavaṁ mārutatulyavegaṁ jitendriyaṁ buddhimatāṁ variṣṭham ।**
**vātātmajaṁ vānarayūthamukhyaṁ Śrīrāmadūtaṁ śirasā namāmi ।।**

## Sūrya Mantraḥ सूर्य मन्त्रः

नमः सवित्रे जगदेकचक्षुषे जगत् प्रसूतिः स्थिति नाश हेतवे ।

त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायण शङ्करात्मने ॥

**namaḥ savitre jagadekacakṣuṣe jagat prasūtiḥ sthiti nāśa hetave ।**
**trayīmayāya triguṇātmadhāriṇe viriñcinārāyaṇa śaṅkarātmane ।।**

## Ekaślokī Bhāgavatam एकश्लोकी भागवतम्

आदौ देवकि देवि गर्भ जननं गोपीगृहे वर्धनं

मायापूतन जीवितापहरणं गोवर्धनोद्धारणम् ।

कंसच्छेदन कौरवादि हननं कुन्तिसुतां पालनं

एतद् भागवतं पुराणकथितं श्रीकृष्ण लीलामृतम् ॥

**ādau devaki devi garbha jananaṁ gopīgṛhe vardhanaṁ**
**māyāpūtana jīvitāpaharaṇaṁ govardhanoddhāraṇam ।**
**kaṁsacchedana kauravādi hananaṁ kuntisutāṁ pālanaṁ**
**etad bhāgavataṁ purāṇakathitaṁ śrīkṛṣṇa līlāmṛtam ।।**